श्री रुद्र कवचं

श्री रुद्र कवचं

ॐ अस्य श्री रुद्र कवचस्तोत्र महामंत्रस्य दूर्वासऋषिः अनुष्टुप् छंदः त्र्यंबक रुद्रो देवता ह्रां बीजं श्रीं शक्तिः ह्रीं कीलकं मम मनसोऽभीष्टसिद्ध्यर्थे जपे विनियोगः |
ह्रामित्यादि षड्बीजैः षडंगन्यासः ||

ध्यानं |
शांतं पद्मासनस्थं शशिधरमकुटं पंचवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहंतं |
नागं पाशं च घंटां प्रळय हुतवहं सांकुशं वामभागे
नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ||

दूर्वास उवाच |
प्रणम्य शिरसा देवं स्वयंभुं परमेश्वरं |
एकं सर्वगतं देवं सर्वदेवमयं विभुं || 1 ||

रुद्र वर्म प्रवक्ष्यामि अंग प्राणस्य रक्षये |
अहोरात्रमयं देवं रक्षार्थं निर्मितं पुरा || 2 ||

रुद्रो मे चाग्रतः पातु पातु पार्श्वौ हरस्तथा |
शिरो मे ईश्वरः पातु ललाटं नीललोहितः || 3 ||

नेत्रयोस्त्र्यंबकः पातु मुखं पातु महेश्वरः |
कर्णयोः पातु मे शंभुः नासिकायां सदाशिवः || 4 ||

वागीशः पातु मे जिह्वां ओष्ठौ पात्वंबिकापतिः |
श्रीकंठः पातु मे ग्रीवां बाहूंश्चैव पिनाकधृत् || 5 ||

हृदयं मे महादेवः ईश्वरोव्यात् स्तनांतरं |
नाभिं कटिं च वक्षश्च पातु सर्वं उमापतिः || 6 ||

बाहुमध्यांतरं चैव सूक्ष्मरूपः सदाशिवः |
स्वरं रक्षतु सर्वेशो गात्राणि च यथा क्रमं || 7 ||

वज्रशक्तिधरं चैव पाशांकुशधरं तथा |
गंडशूलधरं नित्यं रक्षतु त्रिदशेश्वरः || 8 ||

प्रस्थानेषु पदे चैव वृक्षमूले नदीतटे |
संध्यायां राजभवने विरूपाक्षस्तु पातु मां || 9 ||

शीतोष्णादथ कालेषु तुहि न द्रुमकंटके |
निर्मनुष्येऽसमे मार्गे त्राहि मां वृषभध्वज || 10 ||

इत्येतद्रुद्रकवचं पवित्रं पापनाशनं |
महादेवप्रसादेन दूर्वासो मुनिकल्पितं || 11 ||

ममाख्यातं समासेन न भयं विंदति क्वचित् |
प्राप्नोति परमारोग्यं पुण्यमायुष्यवर्धनं || 12 ||

विद्यार्थी लभते विद्यां धनार्थी लभते धनं |
कन्यार्थी लभते कन्यां न भयं विंदते क्वचित् || 13 ||

अपुत्रो लभते पुत्रं मोक्षार्थी मोक्षमाप्नुयात् |
त्राहि त्राहि महादेव त्राहि त्राहि त्रयीमय || 14 ||

त्राहि मां पार्वतीनाथ त्राहि मां त्रिपुरंतक |
पाशं खट्वांग दिव्यास्त्रं त्रिशूलं रुद्रमेव च || 15 ||

नमस्करोमि देवेश त्राहि मां जगदीश्वर |
शत्रुमध्ये सभामध्ये ग्राममध्ये गृहांतरे || 16 ||

गमनागमने चैव त्राहि मां भक्तवत्सल |
त्वं चित्तं त्वं मानसं च त्वं बुद्धिस्त्वं परायणं || 17 ||

कर्मणा मनसा चैव त्वं बुद्धिश्च यथा सदा |
ज्वरभयं छिंदि सर्वज्वरभयं छिंदि ग्रहभयं छिंदि || 18 ||

सर्वशत्रून्निवर्त्यापि सर्वव्याधिनिवारणं |
रुद्रलोकं स गच्छति रुद्रलोकं सगच्छत्योन्नम इति || 19 ||

इति स्कंदपुराणे दूर्वास प्रोक्तं श्री रुद्रकवचं ||